श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्रीलक्ष्मीसहस्रनामस्तोत्रम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font. Our sincere thanks to Sri. Sundar Varadarajan of Chennai for proofreading this text.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीलक्ष्मीसहस्रनामस्तोत्रम् ॥

अस्य श्रीमहालक्ष्मीसहस्रनामस्तोत्रमहामन्त्रस्य।
श्रीमहाविष्णुर्भगवानृषिः। अनुष्टुप् छन्दः।
श्रीमहालक्ष्मीर्देवता। श्रीं बीजम्।
ह्रीं शक्तिः। ह्रैं कीलकम्।
श्रीमहालक्ष्मीप्रसादसिद्ध्यर्थे जपे विनियोगः।

## ध्यानम्

पद्मानने पद्मकरे सर्वलोकैकपूजिते।
सान्निध्यं कुरु मे चित्ते विष्णुवक्षःस्थलस्थिते॥ १ ॥

भगवद्दक्षिणे पार्श्वे श्रियं देवीमवस्थिताम्।
ईश्वरीं सर्वभूतानां जननीं सर्वदेहिनाम्॥ २ ॥

चारुस्मितां चारुदतीं चारुनेत्राननभ्रुवम्।
सुकपोलां सुकर्णाग्रन्यस्तमौक्तिककुण्डलाम्॥ ३ ॥

सुकेशां चारुबिंबोष्ठीं रक्ततुङ्गघनस्तनीम्।
अलकाग्रैरलिनिभैरलङ्कृतमुखाम्बुजाम्॥ ४ ॥

लसत्कनकसङ्काशपीनसुन्दरकन्धराम्।
निष्ककण्ठीं स्तनालम्बिमुक्ताहारविराजिताम्॥ ५ ॥

नीलकुन्तलमध्यस्थमाणिक्यमकुटोज्ज्वलाम्।
शुक्लमाल्याम्बरधरां तप्तहाटकवर्णिनीम्॥ ६ ॥

अनन्यसुलभैस्तैस्तैर्गुणैः सौम्य मुखैर्निजैः।
अनुरूपानवद्याङ्गीं हरेर्नित्यानपायिनीम्॥ ७ ॥

www.prapatti.com

## अथ स्तोत्रम्

श्रीर्वासुदेवमहिषी पुंप्रधानेश्वरेश्वरी।
अचिन्त्यानन्तविभवा भावाभावविभाविनी॥ १ ॥

अहंभावात्मिका पद्मा शान्तानन्तजितात्मिका।
ब्रह्मभावं गता त्यक्तभीता सर्वजगन्मयी॥ २ ॥

षाड्गुण्यपूर्णा त्रय्यन्तरूपाऽऽत्मनपगामिनी।
एकयोग्याऽशून्य भावाकृतिस्तेजः प्रभाविनी॥ ३ ॥

भाव्यभावकभावाऽऽत्मभाव्या कामधुगात्मभूः।
भावाभावमयी दिव्या भेद्यभेदकभावगा॥ ४ ॥

जगत्कुटुम्बिन्यखिलाधारा कामविजृम्भिणी।
पञ्चकृत्यकरी पञ्चशक्तिमय्यात्मवल्लभा॥ ५ ॥

भावाभावानुगा सर्वसम्मताऽऽत्मोपगूहिनी।
अपृथक्चारिणी सौम्या सौम्यरूपाऽव्यवस्थिता॥ ६ ॥

आद्यन्तरहिता देवी भवभाव्यस्वरूपिणी।
महाविभूतिस्समतां गता ज्योतिर्गणेश्वरी॥ ७ ॥

सर्वकार्यकरी धर्मस्वभावात्माऽग्रतः स्थिता।
आज्ञासमविभक्ताङ्गी ज्ञानानन्दक्रियामयी॥ ८ ॥

स्वातन्त्र्यरूपा देवोरःस्थिता तद्धर्मधर्मिणी।
सर्वभूतेश्वरी सर्वभूतमाताऽऽत्ममोहिनी॥ ९ ॥

सर्वाङ्गसुन्दरी सर्वव्यापिनी प्राप्तयोगिनी।
विमुक्तिदायिनी भक्तगम्या संसारतारिणी॥ १० ॥

धर्मार्थवादिनि व्योमनिलया व्योमविग्रहा।
पञ्चव्योमपदी रक्षव्यावृत्तिः प्राप्यपूरिणी॥ ११ ॥

www.prapatti.com

आनन्दरूपा सर्वाप्तिशालिनी शक्तिनायिका।
हिरण्यवर्णा हैरण्यप्राकारा हेममालिनी॥ १२ ॥

प्रस्फुरत्ता भद्रहोमा वेशिनी रजतस्रजा।
स्वाज्ञाकार्यमरा नित्यसुरभिर्व्योमचारिणी॥ १३ ॥

योगक्षेमावहा सर्वसुलभेच्छाक्रियात्मिका।
महासमूहा निखिलप्ररोहा वेदगोचरा॥ १४ ॥

विस्मयाधायिनी ब्रह्मसंहिता सुगुणोत्तरा।
प्रज्ञापरिमिताऽऽत्मानुरूपा सत्योपयार्जिता॥ १५ ॥

मनोज्ञेया ज्ञानगम्या नित्यमुक्ताऽऽत्मसेविनी।
कर्तृशक्तिः सुगहना भोक्तृशक्तिर्गुणप्रिया॥ १६ ॥

ज्ञान शक्तिरनौपम्या परशक्तिर्निरामया।
अकलङ्का महाशक्तिर्निराधारा विकासिनी॥ १७ ॥

महामाया महानन्दा ब्रह्मनीतिर्निराश्रया।
एकस्वरूपा त्रिविधा सङ्ख्यातीता निरञ्जना॥ १८ ॥

आत्मसक्ता नित्यशुचिर्निर्विकल्पा सुखोचिता।
नित्यशान्ता निस्तरङ्गा निर्भिन्ना सर्वभेदिनी॥ १९ ॥

असङ्कीर्णाऽविधेयात्मा निषेद्ध्या सर्वपावनी।
निष्कामना सर्वरसाऽभेद्या सर्वार्थसाधिनी॥ २० ॥

अनिर्देश्याऽपरिमिता निर्विकारा त्रिलक्षणा।
अभयङ्करी स्त्रीस्वरूपाऽव्यक्ता सदसदाकृतिः॥ २१ ॥

अप्रतर्क्याऽप्रतिहता नियन्त्री यन्त्रवाहिनी।
हार्दमूर्तिर्महामूर्तिरव्यक्ता विश्वगोपिनी॥ २२ ॥

वर्धमानाऽनवद्याङ्गी निरवद्या त्रिवर्गदा।
अप्रमेयाऽमृतदुघा कूटस्था कुलनन्दिनी॥ २३ ॥

अविगीता तन्त्रसिद्धा योगसिद्धाऽमरेश्वरी।
विश्वसूतिस्तर्पयन्ती नित्यतृप्ता महौषधिः॥ २४ ॥

शब्दात्यया शब्दसहा कृतज्ञा कृतलक्षणा।
त्रिवर्तिनी त्रिलोकस्था भूर्भुवस्स्वरयोनिजा॥ २५ ॥

अग्राह्याऽग्राहिकाऽनन्ताह्वया सर्वातिशायिनी।
व्योमपद्मा कृतधुरा पूर्णकामा महेश्वरी॥ २६ ॥

सुवाच्या वाचिका सत्यकथना सर्वपावनी।
लक्ष्यमाणा लक्षयन्ती जगज्ज्येष्ठा शुभावहा॥ २७ ॥

जगत्प्रतिष्ठा भुवनभर्त्री गूढप्रभाविनी।
क्रियायोगात्मिका मूर्ता हृदब्जस्था महाक्रमा॥ २८ ॥

परमद्यौः प्रथमजा परमाप्ता जगन्निधिः।
आत्मानपायिनी तुल्यस्वरूपा समलक्षणा॥ २९ ॥

तुल्यवृत्ता समवया मोदमाना खगध्वजा।
तुल्यचेष्टा तुल्यशीला वरदा कामरूपिणी॥ ३० ॥

समग्रलक्षणाऽनन्ता तुल्यभूतिः सनातना।
महर्द्धिः सत्यसङ्कल्पा भूमिजा परमेश्वरी॥ ३१ ॥

जगन्माता सूत्रवती भूतधात्री यशस्विनी।
महाभिलाषा सावित्री प्रधाना सर्वभासिनी॥ ३२ ॥

नानावपुर्बहुविधा सर्वज्ञा पुण्यकीर्तना।
भूताश्रया हृषीकेशा अशोका स्वाङ्गिवाहिका॥ ३३ ॥

ब्रह्मात्मिका पुण्यजनी सत्यकामा समाधिभूः।
हिरण्यगर्भा गम्भीरा गोधूली कमलासना॥ ३४ ॥

जितक्रोधा कुमुदिनी वैजयन्ती मनोजवा।
धनलक्ष्मीः स्वस्तिकरी राज्यलक्ष्मीर्महासती॥ ३५ ॥



www.prapatti.com

जयलक्ष्मीर्महागोष्ठी मघोनी माधवप्रिया।
पद्मगर्भा वेदवती विविक्ता परमेष्ठिनी॥ ३६ ॥

सुवर्णबिन्दुर्महती महायोगिप्रियाऽनघा।
पद्मे स्थिता वेदमयी कुमुदा जयवाहिनी॥ ३७ ॥

संहतिर्निर्मिता ज्योतिर्नियतिर्विविधोत्सवा।
रुद्रवन्द्या सिन्धुमती वेदमाता मधुव्रता॥ ३८ ॥

विश्वम्भरा हैमवती समुद्रेच्छाविहारिणी।
अनुकूला यज्ञवती शतकोटिः सुपेशला॥ ३९ ॥

धर्मोदया धर्मसेवा सुकुमारी सभावती।
भीमा ब्रह्मस्तुता मध्यप्रभा देवर्षिवन्दिता॥ ४० ॥

देवभोग्या महाभागा प्रतिज्ञा पूर्णशेवधिः।
सुवर्णा रुचिरप्रख्या भोगिनी भोगदायिनी॥ ४१ ॥

वसुप्रणोत्तमवधूर्गायत्री कमलोद्भवा।
विद्वत्प्रिया पद्मचिह्ना वरिष्ठा कमलेक्षणा॥ ४२ ॥

पद्मप्रिया सुप्रसन्ना प्रमोदा प्रियपार्श्वगा।
विश्वभूषा कान्तिमती कृष्णा वीणारवोत्सुका॥ ४३ ॥

रोचिष्करी स्वप्रकाशा शोभमाना विहङ्गमा।
देवाङ्कस्था परिणतिः कामवत्सा महामतिः॥ ४४ ॥

इल्वलोत्पलनाभाऽधिशमनी वरवर्णिनी।
स्वनिष्ठा पद्मनिलया सद्गतिः पद्मगन्धिनी॥ ४५ ॥

पद्मवर्णा कामयोनिश्चण्डिका चारुकोपना।
रतिस्नुषा पद्मधरा पूज्या त्रैलोक्यमोहिनी॥ ४६ ॥

नित्यकन्या बिन्दुमालिन्यक्षया सर्वगन्धिनी।
गन्धात्मिका सुरसिका दीप्तमूर्तिः सुमध्यमा॥ ४७ ॥



www.prapatti.com

पृथुश्रोणी सौम्यमुखी सुभगा विष्टरश्रुतिः।
स्मितानना चारुगतिर्निम्ननाभिर्महास्तनी॥ ४८ ॥

स्निग्धवेणी भगवती सुकान्ता वामलोचना।
पल्लवाङ्घ्रिः पद्ममनाः पद्मबोधा महाप्सराः॥ ४९ ॥

सरस्वती चारुहासा शुभदृष्टिः ककुद्मिनी।
कम्बुग्रीवा सुजघना रक्तपाणि मनोरमा॥ ५० ॥

पद्मिनी मन्दगमना चतुर्दंष्ट्रा चतुर्भुजा।
शुभरेखा विलासभ्रूः शुकवाणी कलावती॥ ५१ ॥

ऋजुनासा कलरवा वरारोहा तलोदरी।
सन्ध्या बिम्बाधरा पूर्वभाषिणी श्रीसमाह्वया॥ ५२ ॥

इक्षुचापा सुमशरा दिव्यभूषा मनोहरा।
वासवी पाण्डरच्छत्रा करभोरुस्तिलोत्तमा॥ ५३ ॥

सीमन्तिनी प्राणशक्तिर्विभीषिण्यसुधारिणी।
भद्रा जयावहा चन्द्रवदना कुटिलालका॥ ५४ ॥

चित्राम्बरा चित्रगन्धा रत्नमौलिसमुज्ज्वला।
दिव्यायुधा दिव्यमाल्या विशाखा चित्रवाहना॥ ५५ ॥

अम्बिका सिन्धुतनया निश्रेणी सुमहासिनी।
सामप्रिया नवमृगी सर्वसेव्या वराङ्गना॥ ५६ ॥

गन्धद्वारा दुराधर्षा नित्यपुष्टा करीषिणी।
देवजुष्टाऽऽदिव्यवर्णा दिव्यगन्धा स्वकर्दमा॥ ५७ ॥

अनन्तरूपाऽनन्तस्था सर्वदाऽनन्तसङ्गमा।
यज्ञाशिनी महावृष्टिः सर्वपूज्या वषट्क्रिया॥ ५८ ॥

योगप्रिया वियन्नाभिरनन्तश्रीरतीन्द्रिया।
योगिसेव्या सत्यरता योगमाया पुरातनी॥ ५९ ॥



www.prapatti.com

सर्वेश्वरी सुतरुणी शरण्या धर्मदेवता।
सुतरा संवृतज्योतिर्योगिनी योगसिद्धिदा॥ ६० ॥

सृष्टिशक्तिर्द्योतमानाभूता मङ्गळदेवता।
संहारशक्तिः प्रबला निरुपाधिः परावरा॥ ६१ ॥

उत्तारिणी तारयन्ती शाश्वती समितिञ्जया।
महाश्रीरजहत्कीर्तिर्योगश्रीः सिद्धिसाधनी॥ ६२ ॥

पुण्यश्रीः पुण्यनिलया ब्रह्मश्रीर्ब्राह्मणप्रिया।
राजश्री राजकलिता फलश्रीः स्वर्गदायिनी॥ ६३ ॥

देवश्रीरद्भुतकथा वेदश्रीः श्रुतिमार्गिणी।
तमोपहाऽव्ययनिधिर्लक्ष्मणा हृदयङ्गमा॥ ६४ ॥

मृतसञ्जीविनी शुभ्रा चन्द्रिका सर्वतोमुखी।
सर्वोत्तमा मित्रविन्दा मैथिली प्रियदर्शना॥ ६५ ॥

सत्यभामा वेदवेद्या सीता प्रणतपोषिणी।
मूलप्रकृतिरीशाना शिवदा दीप्रदीपिनी॥ ६६ ॥

अभिप्रिया स्वैरवृत्ती रुक्मिणी सर्वसाक्षिणी।
गान्धारिणी परगतिस्तत्त्वगर्भा भवाभवा॥ ६७ ॥

अन्तर्वर्तिर्महामुद्रा विष्णुदुर्गा महाबला।
मदयन्ती लोकधारिण्यदृश्या सर्वनिष्कृतिः॥ ६८ ॥

देवसेनाऽऽत्मफलदा वसुधा मुख्यमातृका।
क्षीरधारा घृतमयी जुह्वती यज्ञदक्षिणा॥ ६९ ॥

योगनिद्रा योगरता ब्रह्मचर्या दुरत्यया।
सिंहपिञ्छा महादुर्गा जयन्ती खगवाहिनी॥ ७० ॥

जगत्प्रिया विरूपाक्षी सुवर्णा क्रूरतापिनी।
कात्यायनी कालरात्रिर्निशिदृष्टा करालिका॥ ७१ ॥

www.prapatti.com

त्रिशूलिनी खड्गधरा महाकालीन्द्रमालिनी।
एकवीरा भद्रकाली सौनन्दी उल्लसद्गदा॥ ७२॥

नारायणी जगत्पूरिण्युर्वरा द्रुहिणप्रसूः।
यज्ञकामा लेलिहाना तीर्थकर्युग्रविक्रमा॥ ७३॥

गरुत्मदुदयाऽत्युग्रा वाराही मातृभीषिणी।
अश्वक्रान्ता रथक्रान्ता विष्णुक्रान्तोरुचारिणी॥ ७४॥

वैरोचिनी नारसिंही जीमूता शुभदेक्षणा।
दीक्षाविधा विश्वशक्तिर्निजशक्तिः सुदर्शिनी॥ ७५॥

प्रतीतिर्जगती वन्यधारिणी कलिनाशिनी।
अयोध्याऽच्छिन्नसन्ताना महारत्ना सुखावहा॥ ७६॥

राजवर्त्यर्कप्रतिभा विनयत्री महाशना।
अमृतस्यन्दिनी सीमा यज्ञगर्भा समीक्षणा॥ ७७॥

आकूतिर्ऋग्यजुस्सामघोषाऽऽरामवधूत्सुका।
सोमपा माधवी नित्यकल्याणी कमलार्चिता॥ ७८॥

योगरूढिः स्वार्थजुष्टा वह्निवर्णा जितासुरा।
यज्ञविद्या गुह्यविद्याऽध्यात्मविद्या कृतागमा॥ ७९॥

आप्यायिनी कलातीता सुमित्रा परभक्तिदा।
काङ्क्षमाणा महामाया कोलकामाऽमरावती॥ ८०॥

सुवीर्या दुःस्वप्नहरा देवकी वसुदेवता।
सौदामिनी मेघरथा ऋद्धिदा दैत्यमर्दिनी॥ ८१॥

श्रेयस्करी चित्रलीलैकायिनी रत्नपादुका।
मनस्यमाना तुलसी रोगनाशिन्युरुप्रथा॥ ८२॥

तेजस्विनी सुखोज्ज्वाला मन्दरेखाऽमृताशिनी।
ब्रह्मिष्ठा वह्निशमनी जुषमाणा गुणात्यया॥ ८३॥

कादम्बरी ब्रह्मरता विधात्र्युज्ज्वलहस्तिका।
अक्षोभ्या सर्वतोभद्रा वयस्या स्वस्तिदक्षिणा॥ ८४॥

सहस्रास्या ज्ञानमाता वैश्वानर्यक्षवर्तिनी।
प्रत्यग्वरा वारणवत्यनसूया दुरासदा॥ ८५॥

अरुन्धती कुण्डलिनी भव्या दुर्गतिनाशिनी।
मृत्युञ्जया त्रासहरा निर्भया शत्रुसूदिनी॥ ८६॥

एकाक्षरा सुपुरन्ध्री सुरपक्षा वरातुला।
सकृद्विभासा प्रद्युम्ना हरिभद्रा धुरन्धरा॥ ८७॥

बिल्वप्रियाऽवनी चक्रहृदया कम्बुतीर्थगा।
सर्वमन्त्रात्मिका विद्युद्यशोदा सर्वरञ्जिनी॥ ८८॥

ध्वजच्छत्राश्रया भूमिर्वैष्णवी सद्गुणोज्ज्वला।
सुषेणा लोकविदिता कामसूर्जगदादिभूः॥ ८९॥

वेदान्तयोनिर्जिज्ञासा मनीषा समदर्शिनी।
सहस्रशक्तिरावृतिः सुस्थिरा श्रेयसां निधिः॥ ९०॥

रोहिणी रेवती चन्द्रसोदरी भद्रमोदिनी।
आर्या गव्यप्रिया विश्वभाविनी सुविभाविनी॥ ९१॥

सुप्रदृश्या कामचारिण्यप्रमत्ता ललन्तिका।
मोक्षलक्ष्मीर्जगद्योनिर्व्योमलक्ष्मीः सुदुर्लभा॥ ९२॥

भास्करी पुण्यगेहस्था मनोज्ञा विभवप्रदा।
लोकस्वामिन्यच्युतार्था पुष्कला जगदाकृतिः॥ ९३॥

विचित्रहारिणी कान्ता पाविनी भूतभाविनी।
प्राणिनी प्राणदा विद्वद्विश्वब्रह्माण्डवासिनी॥ ९४॥

सम्पूर्णा परमोत्साहा श्रीपतिः श्रीमतिः श्रुतिः।
श्रयन्ती श्रयमाणा क्ष्मा विश्वरूपा प्रसादिनि॥ ९५॥



www.prapatti.com

हर्षणी प्रथमा सर्वा विशाला कामवर्षिणी।
सुप्रतीका पृश्निमतीर्निवृत्तिर्विविधा परा॥ ९६ ॥

सुयज्ञा मधुरा श्रीदा देवरातिर्महामनाः।
स्थूला सर्वाकृतिः सूक्ष्मा निम्नगव्या तमोनुदा॥ ९७ ॥

तुष्टिर्वागीश्वरी पुष्टिः सर्वाद्या स्वरुशोषिणी।
शक्त्यात्मिका शब्दशक्तिर्विशिष्टा वायुमत्युमा॥ ९८ ॥

आन्वीक्षिकी त्रयी वार्ता दण्डनीतिर्नियामिका।
व्याली सङ्कर्षणी द्योता महादेव्यपराजिता॥ ९९ ॥

कपिला पिङ्गला स्वस्था बलाकी घोषनन्दिनी।
अजिता कर्षणी क्षान्तिर्गरुडा गरुडासना॥ १०० ॥

ह्लादिन्यनुग्रहा नित्या ब्रह्मविद्या हिरण्मयी।
मही शुद्धविदा पृथ्वी शतानन्दांशुमालिनी॥ १०१ ॥

यज्ञाश्रया ख्यातिपरा स्तव्या घृष्टिस्त्रिकालगा।
सम्बोधिनी शब्दपूर्णा विजयांशुमती कला॥ १०२ ॥

शिवा स्तुतिप्रिया ख्यातिर्जीवयन्ती पुनर्वसुः।
दीक्षा भक्तार्तिहा रक्षा परीक्षा यज्ञसंभवा॥ १०३ ॥

आर्द्रा पुष्करिणी पुण्या गण्या दारिद्र्यभञ्जिनी।
धन्या मान्या पद्मनेमी भार्गवी वंशवर्धिनी॥ १०४ ॥

तीक्ष्णप्रवृत्तिः सत्कीर्तिर्निधिसेव्याऽघनाशिनी।
सञ्ज्ञा निस्संशया पूर्वा वनमाला वसुन्धरा॥ १०५ ॥

पृथ्वी महोत्कटाऽहल्या मण्डलाश्रितमानदा।
सर्वा नित्योदितोदारा जृम्भमाणा महोदया॥ १०६ ॥

चन्द्रकान्तोदिता सूर्या चतुरश्रा मनोजवा।
बाला कुमारी युवती करुणा भक्तवत्सला॥ १०७ ॥



www.prapatti.com

मेदिन्युपनिषन्मिश्रा सुमवीरुर्धनेश्वरी।
दुर्मर्षणी सुचरिता बोधा शोभा सुवर्चला॥ १०८ ॥

यमुनाक्षौहिणी गङ्गा मन्दाकिन्यमलाशया।
गोदा गोदावरी चन्द्रभागा कावेर्युदन्वती॥ १०९ ॥

सिनीवाली कुहू राका वारणा सिन्धुमत्यमा।
पूर्तिर्मायात्मिका स्फूर्तिर्व्याख्या सूत्रा प्रजावती॥ ११० ॥

वृद्धिः स्थितिर्ध्रुवा बुद्धिस्त्रिगुणा गुणगह्वरा।
अमोघा शान्तिदा सत्या ज्ञानदोत्कर्षिणी शिवा॥ १११ ॥

प्रकृतिर्भामिनी लोला कमला कामधुग्विधिः।
प्रज्ञा रामा परा सन्ध्या सुभद्रा सर्वमङ्गला॥ ११२ ॥

नन्दा भद्रा जया रिक्ता तिथिपूर्णा ऋतंभरा।
काष्ठा कामेश्वरी निष्ठा काम्या रम्या धरा स्मृतिः॥ ११३ ॥

शङ्खिनी चक्रिणी श्यामा समा गोत्रा रमा द्युतिः।
शान्तिदा स्तुतिः सिद्धिश्च विरजाऽत्युज्ज्वलाऽव्यया॥ ११४ ॥

वाणी गौरीन्दिरा लक्ष्मीः मेधा श्रद्धाऽप्रमा द्युतिः।
स्वधा स्वाहा रतिरुषा वसुर्विद्या धृतिः सभा॥ ११५ ॥

शिष्टा इष्टा शुची धात्री सुधाराऽक्षोण्यजाऽमृता।
रमण्येका शारदाम्बा समेधाऽऽद्या शुभाक्षरा॥ ११६ ॥

रत्नावली भारतीडा धीर धीः केवलाऽऽत्मदा।
या सा शुद्धिः सोस्मिता का नीला राधाऽमृतोद्भवा॥ ११७ ॥

विभूतिर्निष्कला रम्या रक्षा सुविमला क्षमा।
प्राप्तिर्वासन्तिका लेखा भूरिबीजा महाङ्गदा॥ ११८ ॥

वरधुर्या स्वधा ह्रीर्भूः कामिनी शोकनाशिनी।
माया प्रीतिरसहना नर्मदा गोकुलाश्रया॥ ११९ ॥

अर्कप्रभा रसेभा श्रीनिलयेन्दुप्रभाऽद्भुता।
श्रीः कृशानु प्रभा वज्रलम्भना सर्वभूमिदा॥ १२० ॥

भोगप्रिया भोगवती भोगीन्द्रशयनासना।
अश्वपूर्वा रथमध्या हस्तिनादप्रबोधिनी॥ १२१ ॥

सर्वलक्षणलक्षण्या सर्वलोकप्रियङ्करी।
सर्वमङ्गलमाङ्गल्या दृष्टादृष्टफलप्रदा॥ १२२ ॥

॥ इति श्रीलक्ष्मीसहस्रनामस्तोत्रम् संपूर्णम् ॥

www.prapatti.com